শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী রাঘৱাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী রাঘৱাষ্টকম্ ॥

ভুৱনগুপ্তযে ব্রহ্মণার্চিতং
দশরথালযে ৱ্যক্তিমাগতম্।
জনকনন্দিনীলক্ষ্মণান্ৱিতং
ভজ মনঃ সদা রামমদ্ভুতম্॥ **1** ॥

কমললোচনং পাপমোচনং
স্ৱজনরঞ্জনং দৈত্যভঞ্জনম্।
ষডরিমর্দনং বোধৱর্ধনং
ভজ মনঃ সদা রামমদ্ভুতম্॥ **2** ॥

সুরপতিং হ্যযোধ্যাপুরে ৱরে
সুরতরোঃ স্থলে মণ্ডপান্তরে।
মণিমযাসনে সম্যগাস্থিতং
ভজ মনঃ সদা রামমদ্ভুতম্॥ **3** ॥

অগণিতৌজসং দণ্ডসাগরং
প্রণততাপসং সাধুমানসম্।
অমিতভাসসং পীতৱাসসং
ভজ মনঃ সদা রামমদ্ভুতম্॥ **4** ॥

অমরকিন্নরৈস্সিদ্ধচারণৈ -
র্মুনিৱরৈর্নরৈরপ্সরোগণৈঃ।
পরমৱিদ্যযা সম্যগর্চিতং
ভজ মনঃ সদা রামমদ্ভুতম্॥ **5** ॥

মদনকোটিসৌন্দর্যমোহনং
    চরণভক্তিভাক্কামদোহনম্।
হৃদযপঙ্কজেঽধ্যাত্মহৃৎপদং
    ভজ মনঃ সদা রামমদ্ভুতম্॥ **6**॥

চরিতৱিস্তরং কোটিভেষজং
    ত্রিদশৱিশ্রুতং নামসংস্থিতম্।
জপতি শঙ্করোঽৱাপ্ততৎপরং
    ভজ মনঃ সদা রামমদ্ভুতম্॥ **7**॥

এতদদ্ভুতং রাঘৱাষ্টকং
    প্রতিদিনং পঠেদ্ভক্তিপূর্ৱকম্।
তনুমিমাং যথাহেযকঞ্চুকং
    ৱিরহযল্লভেজ্জ্যোতিরাত্মকম্॥ **8**॥

॥ ইতি শ্রী রাঘৱাষ্টকং সমাপ্তম্॥